# Devadibhih Kritam Gangadi Nadi Stotram

# દેવાદિભિઃ કૃતં ગઙ્ગાદિ નદીસ્તોત્રમ્

## Document Information

Text title : Devadibhih Kritam Gangadi Nadi Stotram

File name : devAdibhiHkRRitaMgangAdinadIstotram.itx

Category : devii, devI, nadI, skandapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | AvantyakhaNDa | chaturashItikhaNDa | adhyAya 71/65-81||

Latest update : July 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 6, 2025

*sanskritdocuments.org*

# દેવાદિભિઃ કૃતં ગઙ્ગાદિ નદીસ્તોત્રમ્

ઇતિ તસ્ય વચઃ શ્રુત્વા નારદસ્ય મહાત્મનઃ ।
શક્રેણ સહિતાઃ સર્વે હ્યવન્તીં તુ સમાગતાઃ ॥ ૬૪॥

સ્તુવન્તો વિવિધૈઃ સ્તોત્રૈર્ગઙ્ગાં ત્રિપથગાં શુભામ્ ।
ગઙ્ગે દેવિ નમસ્તુભ્યં સર્વપાપપ્રણાશિનિ ॥ ૬૫॥

વસૂનાં જનની દેવિ વસૂનાં મોક્ષદાયિનિ ।
ત્રૈલોક્યપાવની નિત્યં હરેણ શિરસા ધૃતા ॥ ૬૬॥

સેવિતા વાલખિલ્યૈશ્ચ કૃષ્ણસ્ય પરમા કલા ।
યમુને ત્વાં નમસ્યામઃ કાલિન્દીં વરવાહિનીમ્ ॥ ૬૭॥

સુતા ત્વં પાવની દેવિ માર્ત્તણ્ડસ્ય દિવસ્પતેઃ ।
શિપ્રે દેવિ નમસ્તુભ્યં બ્રહ્મદેહોદ્ભવે શુભે ॥ ૬૮॥

પ્રાચી ત્વમેવ વિખ્યાતા પુણ્યદેહા સરસ્વતી ।
યા પ્રાચી કૌરવક્ષેત્રે પુષ્કરે યા મહાલયે ।
સા ત્વં શિપ્રા પ્રસિદ્ધા ચ સર્વપાતકનાશિની ॥ ૬૯॥

ત્વં દયા સર્વજન્તૂનાં ત્વં સ્વર્ગઃ શરણં નૃણામ્ ।
ત્વં માતા સર્વજન્તૂનાં ત્વં પ્રાચી ભુવિ ગીયસે ॥ ૨.૭૧.૭૦॥

બહુજન્મકલઙ્કાઙ્કું દૃષ્ટ્વા યા દેહિનાં ભુવિ ।
કરોષિ ક્ષાલનં દેવિ સા ત્વં ત્રૈલોક્યસંસ્થિતા ॥ ૭૧॥

આસાં ચ સઙ્ગમો યસ્તુ સ પ્રયાગો બુધૈઃ સ્મૃતઃ ।
અત્રાગત્ય તુ યુષ્માભિઃ સ્થાપિતઃ સ્નાપિતોઽધુના ॥ ૭૨॥

સોઽદ્ય પ્રભૃતિ દેવોઽયં પ્રયાગેશ્વરસંજ્ઞકઃ ।
ત્રિષુ લોકેષુ વિખ્યાતઃ સ્મરણાત્પાપનાશનઃ ॥ ૭૩॥

અત્રાગત્ય પ્રપશ્યન્તિ યે પ્રયાગેશ્વરં તતઃ ।

તે કૃતાર્થા ભવિષ્યન્તિ સર્વપાતકવર્જિતાઃ ॥ ૭૪॥

કુલં ચ તારિતં તેષાં પૈતૃકં માતૃકં તથા ।
ગઙ્ગાયાસ્ત્રિયુગં પુણ્યં ચતુર્વર્ગફલપ્રદમ્ ।
જાયતે નાત્ર સન્દેહઃ પ્રયાગેશ્વરદર્શનાત્ ॥ ૭૫॥

ગઙ્ગાયાં ચ પ્રયાગે ચ દેવદારુવને શુભે ।
નૈમિષે પુષ્કરે ચૈવ શ્રીશૈલે ચ ત્રિપુષ્કરે ॥ ૭૬॥

ત્ર્યમ્બકે ધૌતપાપે ચ મહેન્દ્રે ભૈરવે તથા ।
ગોકર્ણે ચ સુવર્ણાખ્યે રેવાકપિલસઙ્ગમે ॥ ૭૭॥

એતેષાં દર્શનેનૈવ યા સિદ્ધિર્દ્વાદશાબ્દિકા ।
સા લભ્યા માસમાત્રેણ પ્રયાગેશ્વરદર્શનાત્ ॥ ૭૮॥

યે પશ્યન્તિ ચતુર્દશ્યામષ્ટમ્યાં ચ વિશેષતઃ ।
ભક્ત્યા ચ નિયમં કૃત્વા પ્રયાગેશ્વરસંજ્ઞકમ્ ॥ ૭૯॥

ન તેષાં પુનરાવૃત્તિઃ કલ્પકોટિશતૈરપિ ।
ભોગદં મોક્ષદં લિઙ્ગં ભવિષ્યતિ મહીતલે ॥ ૨.૭૧.૮૦॥

કલાસ્તિસ્રો ભવિષ્યન્તિ લિઙ્ગેઽસ્મિન્મોક્ષદે શુભે ।
ગઙ્ગા ચ યમુના પ્રાચી સર્વપાતકનાશિની ॥ ૮૧॥

એવમુક્ત્વા સ્તુતા ગઙ્ગા યમુના ચ સરસ્વતી ।
દેવૈઃ પ્રણતિપૂર્વેણ ગતાઃ સ્થાનં સ્વકં તદા ॥ ૮૨॥

દેવાઃ પ્રહૃષ્ટાઃ શક્રાદ્યાઃ પ્રયાગેશ્વરસંજ્ઞકમ્ ।
સ્તુત્વા ચ વિવિધૈઃ સ્તોત્રૈઃ પૂજયિત્વા દિવં ગતાઃ ॥ ૮૩॥

ઇતિ શ્રીસ્કન્દપુરાણે આવન્ત્યખણ્ડે ચતુરશીતિલિઙ્ગમાહાત્મ્યે
એકસપ્તતિતમાધ્યાયાન્તર્ગતં દેવાદિભિઃ કૃતં ગઙ્ગાદિ નદીસ્તોત્રં
સમાપ્તમ્ ।

સ્કન્દપુરાણ । આવન્ત્યખણ્ડ । ચતુરશીતિખણ્ડ । અધ્યાય ૭૧/૬૫-૮૧॥

skandapurANa . AvantyakhaNDa . chaturashItikhaNDa . adhyAya 71/65-81..

Proofread by PSA Easwaran

*Devadibhih Kritam Gangadi Nadi Stotram*

pdf was typeset on July 6, 2025

Please send corrections to *sanskrit@cheerful.com*